# पाणिनीयव्याकरणे विकल्पविचार:

**रामसेवक झा**

शिक्षाशास्त्रिविभागस्य छात्र:

राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपति: (आ.प्र)

वा इत्यव्ययं विकल्पे सादृश्ये अवधारणे समुच्चये च । विभिन्न: कल्प: विकल्प: अथवा विविधं कल्पते इति विकल्प: । विभाषापदस्य विरुद्धा भाषा विभाषेति व्युत्पत्ति: । अथवा विरुद्धाभाषा-विभाषा इति कथ्यन्ते । पाणिनीयव्याकरणमष्टाध्यायीति नाम्ना प्रिसद्धम् । कृतिरियं सूत्रप्रणाल्या निर्मिता । अष्टसु अध्यायेषु विभक्तेऽस्मिन् ग्रन्थे ३ ९ ८ ३ सूत्राणि सन्ति । तेषु बह्वय: विकल्पविधय: वर्तन्ते । विकल्पबोधनाय सूत्रेषु **वा, विभाषा, अन्यतरस्याम्** शब्दा: प्रयुज्यन्ते । तद्वत् **शाकल्य स्फोटायन आपिशलि:** प्रभृतय: व्यक्तिवाचकशब्दा: बहुषु सूत्रेषु दृश्यन्ते । **उदीचां प्राचाम्** इत्यादि पदै: प्रयोगभेदा: प्रतिपादिता: ।

विभाषा जसि, विभाषोर्णो: प्रभृतिषु १ १ २ सूत्रेषु विभाषापदप्रयोग: दृश्यते । **कृत्यानां कर्तरि वा वा आहिताग्न्यादिषु** प्रभृतीनि १ ० ६ सूत्राणि सन्ति वापदघटितानि । ह्रक्रोरन्यतरस्याम्, संज्ञोन्यतरस्यां कर्मणि, प्रभृतिषु ९ ३ सूत्रेषु अन्यतरस्यां शब्दश्च प्रयुज्यते । वा विभाषा अन्यतरस्यां शब्दा: न पर्यायवाचिन: । तेषामर्थभेद: वर्तते । वा = Usally or preferably , विभाषा = Rarely, Preferably not , अन्यतरस्याम् = Some times, Alternatively

पाणिनिना स्वव्याकरणे बहूनि संज्ञासूत्राणि पठितानि । तत्र विभाषासंज्ञाविधायकं सूत्रं भवति, **न वेति विभाषा** १-१-१४ इति । निषेधविकल्पयो: विभाषा संज्ञा विधीयते । विभाषाशब्द: अथवा इति वैकल्पिकार्थे न प्रयुज्यते । सामान्यतया वा शब्द: वैकल्पिकार्थे उपयुज्यते । विपूर्वक भाषा विभाषा । भाषते अनेन इति भाषा । वे: समासे, विदेश: विपथ: इत्यादिषु विगतार्थस्य दृष्टत्वात् विभाषा शब्द: व्यत्यस्त:, व्यत्ययार्थवाचक: । एवं विरुद्धा भाषा विभाषा । एतादृशार्थ: पाणिनिना सम्पूर्णतया न स्वीकृत:, किन्तु तेन अत्यन्तसम्बन्ध: अर्थ: स्वीकृत: । एतेषामभिप्राये- अन्येषामाचार्याणामेव मते अयमस्ति मम मते नास्त्ययम् इति बोधयितुं विभाषापदप्रयोग: । विभाषा = Rarely यदि विभाषा तथा वा शब्दश्च समानार्थे भवत: तर्हि **न वेति विभाषा** इति न स्यात् **वेति विभाषा** इत्येव । तेन विभाषापदस्य वा + न इत्यर्थो भवितुमर्हति ।

**अन्यतरस्या** मित्यस्य निर्वचनं न कृतं परम्परया तस्य विकल्पार्थत्वात् । पाणिनीयव्याकरणे स्वयमविहिता अपि संज्ञा: प्रयुक्ता: । यथा आङ् इति तृतीयैकवचनस्य अत्र शास्त्रे व्यवहृता दृश्यते **आङि चाप:** ७-३-१ ० ५ इत्यत्र । एवं प्रथमा-द्वितीया-तृतीया प्रभृतय: संज्ञा: स्वयमकृता: एव प्रयुक्ता: ।

**अन्यतरस्याम्** अर्थद्वये प्रयुक्त: । लिट्यन्यतरस्याम् २-४-४ ०, पादोऽन्यतरस्याम् ४-१-८ तथा

एकहलादौ पूरयितव्येऽन्यतरस्याम् ६-३-५९ इत्यादिसूत्रेषु वैकल्पिकरूपाणां तुल्यप्राधान्यता दृश्यते । अधिकसंख्याकानि । जघास / आद उदकुम्भः / उदकमुम्भः (उदो वा स्यात्) द्विपदी / द्विपात् (स्त्रियां ङीष् च) ।

अन्यतस्याम् इति शब्दः वैदिके न प्रयुज्यते तदस्थाने वा शब्दः विभाषा शब्दश्च ।

विधीनां वैकल्पिकत्वं बोधयितुमन्ये अपि लघूपायाः स्वीकृताः वर्तन्ते । विधिसूत्रेषु द्विगोः पुंश्च ५-१-५४ च अपि शब्दौ संयुज्य विधीन् विकल्पयति । लोपः शाकल्यस्य, अवङ्स्फोटायनस्य प्रभृतिषु सूत्रेषु शाकल्यादिग्रहणं विकल्पबोधनार्थम् । इञः प्राचाम् २-४-६०, उदीचामिञ् ४-१-१५३, प्राचामवृद्धात् फिन् बहुलम् ४-१-१६०, न प्राच्यभर्गादियौधेयादिभ्यः ४-१-१७८, स्त्रीषु सौवीरसाल्वप्राक्षु: ४-२-७६, प्राचाक्रीडायाम्- ६-२-७४, प्राचां ग्रामनगराणाम् ७-३-१४ इत्यादिसूत्रैः प्रान्तभेदेन स्थानभेदेन च भाषाभेदो दर्शितः । प्राच्येषु उदीच्येषु च प्रयोगभेदाः तेषां साधुत्वार्थं सूत्राणि निर्दिष्टानि ।

पाणिनिना यदा व्याकरणं रचितं तदा संस्कृतं लोकभाषारूपेण आसीत् । तत्समये विभिन्नाः प्रान्तीयशब्दाः प्रचलिताः आसन् । तेषां प्रयोगाणां प्राचुर्यादिकं अवबोधयितुं विभाषा, वा, अन्यतरस्याम् इत्यादि प्रयोगभेदाः अतीवोपकारकाः ।

***